श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीभविष्योत्तरपुराणे श्रीकृष्णयुधिष्ठिरसम्वादे

# ॥ श्रीशालिग्रामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीशालिग्रामस्तोत्रम् ॥

अस्य श्रीशालिग्रामस्तोत्रमन्त्रस्य श्रीभगवान् ऋषिः,
नारायणो देवता, अनुष्टुप् छन्दः,
श्रीशालिग्रामस्तोत्रमन्त्र जपे विनियोगः॥

युधिष्ठिर उवाच
श्रीदेवदेव देवेश देवतार्चनमुत्तमम्।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरूषोत्तम॥ १ ॥

श्रीभगवानुवाच
गण्डक्यां चोत्तरे तीरे गिरिराजस्य दक्षिणे।
दशयोजनविस्तीर्णा महाक्षेत्र वसुन्धरा॥ २ ॥

शालिग्रामो भवेद्देवो देवी द्वारावती भवेत्।
उभयोस्सङ्गमो यत्र मुक्तिस्तत्र न संशयः॥ ३ ॥

शालिग्रामशिला यत्र यत्र द्वारावती शिला।
उभयोस्सङ्गमो यत्र मुक्तिस्तत्र न संशयः॥ ४ ॥

आजन्मकृत पापानां प्रायश्चित्तं य इच्छति।
शालिग्रामशिलावारि पापहारि नमोऽस्तु ते॥ ५ ॥

अकालमृत्युहरणं सर्वव्याधिविनाशनम्।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम्॥ ६ ॥

शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत्॥ ७ ॥

स्नानोदकं पिबेन्नित्यं चक्राङ्कित शिलोद्भवम्।
प्रक्षाल्य इति तत्तोयं ब्रह्महत्यां व्यपोहति॥ ८ ॥

www.prapatti.com

अग्निष्टोमसहस्राणि वाजपेयशतानि च।
सम्यक् फलमवाप्नोति विष्णोर्नैवेद्य भक्षणात्॥ ९ ॥

नैवेद्ययुक्तां तुलसीं च मिश्रितां
विशेषतः पादजलेन विष्णोः।
योऽश्नाति नित्यं पुरतो मुरारेः
प्राप्नोति यज्ञायुत कोटिपुण्यम्॥ १० ॥

खण्डिता स्फुटिता भिन्ना अग्निदग्धास्तथैव च।
शालिग्रामशिला यत्र तत्र दोषो न विद्यते॥ ११ ॥

न मन्त्रः पूजनं नैव न तीर्थं न च भावना।
न स्तुतिर्नोपचारश्च शालिग्राम शिलार्चने॥ १२ ॥

ब्रह्महत्यादिकं पापं मनोवाक्काय संभवम्।
शीघ्रं नश्यति तत्सर्वं शालिग्राम शिलार्चनात्॥ १३ ॥

नानावर्णमयं चैव नानाभोगेन वेष्टितम्।
तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम्॥ १४ ॥

नारायणोद्भवो देवश्चक्रमध्ये च कर्मणा।
तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम्॥ १५ ॥

कृष्णे शिलातले यत्र सूक्ष्मं चक्रं च दृश्यते।
सौभाग्यं सन्ततिं धत्ते सर्वसौख्यं ददाति च॥ १६ ॥

वासुदेवस्य चिह्नानि दृष्ट्वा पापैः प्रमुच्यते।
श्रीधरस्सुकरे वामे हरिद्वर्णस्तु दृश्यते॥ १७ ॥

वाराह रूपिणं देवं कूर्माङ्गैरपि चिह्नितम्।
गोपदं तत्र दृश्येत वाराहं वामनं तथा॥ १८ ॥

पीतवर्णस्तु देवानां रक्तवर्णं भयावहम्।
नारसिंहो भवेद्देवो मोक्षदं च प्रकीर्तितिम्॥ १९ ॥

शङ्खचक्रगदाकूर्माः शङ्खो यत्र प्रदृश्यते।
शङ्खवर्णस्य देवानां वामे देवस्य लक्षणम्॥ २० ॥

दामोदरं तथा स्थूलं मध्येचक्रं प्रतिष्ठितम्।
पूर्णद्वारेण सङ्कीर्णा पीतरेखा च दृश्यते॥ २१ ॥

छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः।
चपटे च महादुःखं शूलाग्रे तु रणं ध्रुवम्॥ २२ ॥

ललाटे शेषभोगस्तु शिरोपरि सुकाञ्चनम्।
चक्रकाञ्चनवर्णानां वामदेवस्य लक्षणम्॥ २३ ॥

वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिङ्गलम्।
लक्ष्मीनृसिंह देवानां पृथग्वर्णस्तु दृश्यते॥ २४ ॥

लम्बोष्ठे च दरिद्रं स्यात्पिङ्गले हानिरेव च।
लग्नचक्रे भवेद्व्याधिर्विदारे मरणं ध्रुवम्॥ २५ ॥

पादोदकं च निर्माल्यं मस्तके धारयेत्सदा।
विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रितम्॥ २६ ॥

कल्पकोटि सहस्राणि वैकुण्ठे वसते सदा।
शालिग्राम शिलाबिन्दुर्हत्याकोटि विनाशनः॥ २७ ॥

तस्मात्संपूजयेत् ध्यात्वा पूजितं चापि सर्वदा।
शालिग्रामशिला स्तोत्रं यः पठेच्च द्विजोत्तमः॥ २८ ॥

स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः।
सर्वपाप विनिर्मुक्तो विष्णुलोकं स गच्छति॥ २९ ॥

दशावतारो देवानां पृथग्वर्णस्तु दृश्यते।
ईप्सितं लभते राज्यं विष्णुपूजामनुक्रमात्॥ ३० ॥

कोटयो हि ब्रह्महत्यानामगम्यागम्यकोटयः।
तास्सर्वा नाशमायान्ति विष्णुनैवेद्य भक्षणात्॥ ३१ ॥


www.prapatti.com

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम्।
तस्मादष्टगुणं पापं भूमौ बिन्दुनिपातनात्॥ ३२॥

॥ इति श्रीशालिग्रामस्तोत्रं संपूर्णम्॥

www.prapatti.com